॥ श्री गणेशाय नमः ॥

# अथ श्री विष्णु पंचोपचार पूजनम्

## ध्यानम्

**( हाथ में अक्षत, पुष्प, तुलसीदल लेकर ध्यान करें )**

**ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं,**
**विश्वाधारं गगनसदृशं मेघवर्णं शुभांङ्गम् ।**
**लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं,**
**वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥**

(ॐ भूर्भुवः स्वः श्री विष्णवे नमः ध्यानं समर्पयामि)
(विष्णु जी के चरणों में अक्षत्, पुष्प, तुलसीदल चढ़ायें)

## चन्दनम्

**ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।**
**विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री विष्णवे नमः चन्दनम् समर्पयामि)
(विष्णु जी के मस्तक में चन्दन लगायें)

## पुष्पम्

**ॐ माल्यादीनिसुगन्धीनि मालत्यादीनि वै प्रभो ।**
**मयाहृतानिपुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥**

ॐ भूर्भुवः स्वः श्री विष्णवे नमः पुष्पम् समर्पयामि
(विष्णु जी के चरणों में पुष्प चढ़ायें)

## धूपम्

**ॐ वनस्पति रसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।**
**आघ्रेयः सर्व देवानां धूपोऽयं प्रतिगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री विष्णवे नमः धूपम् आघ्रापयामि)
(विष्णु जी को धूप दिखायें)

## दीपम्

**ॐ साज्यं च वर्ति संयुक्तं वह्निना योजितं मया ।**
**दीपं गृहाण देवेश त्रैलोक्यतिमिरा पहम् ॥**

(ॐ भूर्भुवः स्वः श्री विष्णवे नमः दीपम् दर्शयामि)
(विष्णु जी को दीप दिखायें)

## नैवेद्यम्

**ॐ शर्कराखण्ड खाद्यानि दधिक्षीरघृतानि च ।**
**आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री विष्णवे नमः नैवेद्यम् निवेदयामि)
(एक पात्र में विष्णु जी के सामने भोग रखें तथा खाली पात्र में तीन बार जल छोड़ें)

## प्रार्थयेत्

**( हाथ में अक्षत, पुष्प, तुलसीदल लेकर प्रार्थना करें )**

**ॐ नमोऽस्त्वनन्ताय सहस्त्रमूर्तये सहस्त्रपादा क्षिशिरो रुबाहवे।**
**सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्र कोटीयुगधारिणे नम् ॥**

(ॐ भूर्भुवः स्वः श्री विष्णवे नमः प्रार्थना पूर्वकं नमस्कारान् समर्पयामि)
(विष्णु जी के चरणों में अक्षत्, पुष्प और तुलसीदल चढ़ायें)

**अनेन पंचोपचार पूजनेन श्रीविष्णु देवता प्रीयतां न मम ॥**

(विष्णु जी के चरणों में एक आचमनी जल चढ़ायें)

॥ इति शुभम् भवतु ॥